Postal Regd.No. GAMC- 1553/2022-2024 **ISSN 2454-6313**

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १७ अङ्क : २०३
ऍप्रिल - २०२३

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### विलक्षणः राक्षसः

प्रत्येकं देहधारी जीवः सुखम् इच्छति । सुखं प्रति प्रीतिः, अधार्मिकी वृत्तिः नास्ति । अस्माकं तपस्विनः ऋषयः अपि सुखं प्रति आकृष्टाः आसन् । ते अपि उक्तवन्तः – 'सुखं त्वेव विजिज्ञासितव्यम् ।' परन्तु अज्ञाः मनुष्याः वैराग्यस्य विपरीतं वेषं धृत्वा सुखं प्रति उदासीनाः भवन्ति । सुखं प्रति द्वेषम् अपि प्रदर्शयन्ति । वस्तुतः सुखं परमतत्त्वेन प्रेषितं किमपि रसमयं स्वादु फलं वर्तते, दुःखं च शुष्कतायाः अरुचिकरं श्मशानम् अस्ति । अस्माकं सर्वविधं प्रशिष्टं साहित्यं मनुष्यं सुखयितुम् एव प्रेरयति । यस्मिन् समाजे साहित्यस्य समृद्धिः नास्ति, सः समाजः नितरां शुष्कः, कर्तव्यमूढः, पीडितः च दृश्यते । साधकः अपि दुःखितः किमर्थं भवेत् ? प्रसन्नः साधकः एव मुक्तिमार्गम् अन्वेष्टुं शक्नोति । जीवनम् उपवनम् अस्ति, मरुभूमिः नास्ति । उपवने शुष्कतायाः कृते 'प्रवेशः निषिद्धः' भवति ।

किं नाम इतिहासः ? इतिहासः केवलं पुरावृत्तं नास्ति । सः तु मानवस्य मानसस्य आत्मकथा अस्ति । महाभारतं मनुष्यस्य प्रतिबिम्बम् अस्ति । तत्र रागः, द्वेषः, ईर्ष्या, वैरम् इत्यादीनां भावानां नद्यः वहन्ति । ताभिः नदीभिः एव भारती कथा शुष्का नास्ति । तथापि मानवस्य इतिहासः सुखस्य आकाङ्क्षायाः, दुःखस्य परिहारस्य च इतिहासः अस्ति । अत्र सुखं रमणीया कल्पना अस्ति, दुःखं कठोरा वास्तविकता अस्ति । उभयोः मध्ये लम्बितः विवशः मनुष्यः त्रिशङ्कुः इव, भविष्यं प्रति पश्यन् जीवति ।

दरिद्रता दुःखम् अस्ति । महात्मा गान्धी कथयति यत् दरिद्रता तु हिंसायाः दुर्मुखं रूपम् अस्ति । दरिद्रं मनुष्यं केवलं धनस्य अभावः पीडयति इति न, तं तु गौरवस्य हानिः विशेषतः पीडयति । 'चारुदत्तम्' भासस्य प्रसिद्धं नाटकम् अस्ति । तत्र नायकः चारुदत्तः धनस्य अभावेन दुःखितः नास्ति । सः समाजस्य कर्कशेन व्यवहारेण दुःखम् अनुभवति । दरिद्रता मनुष्येण प्राप्ता काचित् विकटा स्थितिः अस्ति । ततः सः अपमानितः भवेत् इति समुचितं नैव ।

काचित् वैदेशिकी लेखिका राक्षसस्य कल्पनां करोति । सः काल्पनिकः राक्षसः विलक्षणः अस्ति । राक्षसः किमपि जनं कदापि न पीडयति । कमपि न हिंसयति । परन्तु तस्य एकम् एव मुख्यं कार्यम् विद्यते – अन्यस्य सुखस्य शोषणम् । सः अपरस्य मनुष्यस्य सुखं छिनत्ति । राक्षसेन गृहीतः मनुष्यः जीवति, किन्तु सः सुखहीनः भवति । एषा कल्पना मानवस्य इतिहासे अभिनवा नास्ति । शोषणम्, दरिद्रता, अपमानः, द्वेषः, निन्दा, अपहासः, आतङ्कः वा न हिंसयति चेदपि मनुष्यस्य सुखं नाशयति । दुःखितस्य जनस्य सान्त्वना का ? समाजेन क्रियमाणः सद्व्यवहारः । भद्रः समाजः गौरवस्य दाता भवति, गौरवस्य छेदकः न ।

## न्याय्याचरणम्

– जातककथा

काशीराज्यं यदा ब्रह्मदत्तः पालयन् आसीत् तदा बोधिसत्त्वः मगधदेशे कस्मिंश्चित् ग्रामे माघनाम्ना क्षत्रियकुटुम्बे जन्म प्राप्तवान् आसीत्। ग्रामे यदि कापि समस्या उद्भवेत् तर्हि तस्याः परिहाराय पञ्चाशतः कुटुम्बस्य प्रमुखाः ग्रामसभां सम्मिलन्ति स्म। तस्य ग्रामस्य जनाः अशिक्षिताः, युक्तायुक्तविवेकरहिताः च आसन्। अतः ते चौर्यं, लुण्ठनं, मारणम् इत्यादिकं कुर्वन्ति स्म। ततः ग्रामाधिकारिणे किञ्चित् उत्कोचं दत्त्वा दण्डनात् मुक्तिं प्राप्नुवन्ति स्म।

यत्र ग्रामसभा प्रचलति तत्र मालिन्य-अवकरादयः बहुधा आसन्। एतत् दृष्टवान् माघः आत्मनः उपवेशनाय किञ्चित् स्थलं स्वच्छं कृतवान्। तदा तत् स्थलम् अन्यः आक्रान्तवान्। माघः अपरत्र भूमिं स्वच्छीकृत्य उपवेशनम् आरब्धवान्। तदपि स्थलम् अन्येन आक्रान्तम्।

एतस्मात् माघः न खिन्नः। सः ग्रामसभास्थानं समग्रं स्वच्छीकृतवान्। तावदेव न, आतपपीडानिवारणाय वितानम् अपि निर्मितवान् सः। तस्मात् ग्रामस्य सर्वे जनाः सन्तुष्टाः जाताः। अल्पे एव काले पञ्चाशतः कुटुम्बानां प्रमुखाः माघस्य व्यवहारेण सन्तुष्टाः जाताः। माघः तेषां नेतृत्वं वहन् ग्रामस्य स्वच्छताम् आरब्धवान्। सर्वे जनाः सम्भूय सभासमारम्भादिनिमित्तं विशालं मण्डपं निर्मितवन्तः। उत्तमा पानजलव्यवस्था अपि तत्र कल्पिता।

एतादृशाः व्यवहाराः माघविषये गौरवम् अवर्धयन्। कालान्तरे ग्रामजनानां व्यवहारे अपि परिष्कारः जातः। ते मार्गाणां निम्नोन्नततां समीकृतवन्तः। मार्गम् आवृत्त्य स्थिताः वृक्षशाखाः कर्तयित्वा शकटस्य सञ्चाराय व्यवस्थां कल्पितवन्तः। गर्ताः मृत्तिकया पूरिताः। कासाराः तत्र निर्मिताः। जनानां सञ्चाराय पादमार्गाः अपि बहुत्र निर्मिताः। एतादृशानां सर्वेषां कार्याणां मार्गदर्शकः आसीत् माघः एव।

ग्रामस्य तरुणाः यदा चौर्यलुण्ठनादिषु प्रवृत्ताः आसन्, द्यूतसुरापानादिषु आसक्ताः च आसन्, तदा तु ग्रामप्रमुखः विविधैः मार्गैः धनं सम्पादयति स्म। यः उत्कोचं ददाति तस्य दण्डनं निवारयति स्म सः। यः उत्कोचदानं निराकरोति तस्मात् द्विगुणितं धनं वशीकरोति स्म दण्डरूपेण। किन्तु माघः यदा तेषां नेतृत्वम् ऊढवान्, तान् सम्मार्गगामिनः यदा कृतवान् तदा तस्य एषः वाममार्गीयः आयः स्थगितः।

एतत् असहमानः सः कदाचित् राजानं दृष्ट्वा अवदत् – ''महाराज ! अस्माकं ग्रामे अराजकता उत्पन्ना अस्ति। माघनामकस्य कस्यचित् तरुणस्य नेतृत्वे जनाः लवित्रपरशुप्रभृतीन् गृहीत्वा सर्वदा अटन्तः दृश्यन्ते। ग्रामे सर्वत्र तेषाम् एव सञ्चारः। एतस्मात् जनानां प्राणापायः सम्भवेत्। सम्पत्तिरक्षणं न भवेत्। वस्तुस्थितिनिवेदनं मम कर्तव्यम्। तत् मया कृतम् अस्ति। इतःपरं तत्रभवान् प्रमाणम्'' इति।

'ग्रामस्य स्थितिं परिशील्य, यदि ग्रामप्रमुखस्य वचने सत्यता दृश्यते तर्हि अत्याचारिणः बद्ध्वा आनेतव्याः' इति आदिश्य राजा अधिकारिणः सैनिकान् च प्रेषितवान्। सैनिकाः ग्रामं प्राप्तवन्तः। प्रवेशसमये एव दण्ड-परशु-लवित्रादिधारिणः बहवः जनाः तैः दृष्टाः। सैनिकाः एतद्विषये अधिकं चिन्तनं किमपि अकुर्वन्तः तान् आयुधधारिणः सर्वान् बद्ध्वा राजधानीं नीत्वा राज्ञः पुरतः उपस्थापितवन्तः।

राजा तेषां हस्तेषु आयुधानि अपश्यत्। तेषाम् उपयोगः कथं क्रियते तैः इति सः न चिन्तितवान् एव।

ग्रामप्रमुखस्य वचनं सत्यम् एव इति विचिन्त्य सः आज्ञापितवान् – ''एतान् गजानां पादैः विमर्दयन्तु'' इति। माघः तदनुयायिनः च अङ्गणे स्थापिताः। पादैः विमर्दनाय भटैः पट्टगजः आनीतः। सः पट्टगजः तान् दूरतः एव दृष्ट्वा तत्रैव अतिष्ठत्।

ततः भटैः अन्यः गजः आनीतः। सः तु तान् दृष्ट्वा ततः धावनम् एव अकरोत्।

एषा वार्ता राज्ञा ज्ञाता। राजा अचिन्तयत् यत् एते गजनिवारकं तायकं किमपि धृतवन्तः स्युः, मन्त्रविशेषं वा प्रयुक्तवन्तः स्युः इति। अतः सः भटान् आज्ञापितवान् – ''तेषां सर्वेषां परीक्षा क्रियताम्। यदि कोऽपि तायकं धृतवान् स्यात् तर्हि तत् अपनीयताम्। ततः तेषां मर्दनाय गजः प्रेर्यताम्'' इति।

भटाः एकैकस्यापि परीक्षणं कृतवन्तः। किन्तु कोऽपि तायकधारी न दृष्टः तैः। एतत् ज्ञातवान् राजा भटान् आज्ञापितवान् – ''तान् विचारणाय मत्समीपं पुनः आनयन्तु'' इति। भटैः तथैव कृतम्।

राजा तान् अपृच्छत् – ''मर्दनाय आगताः गजाः किमर्थं तूष्णीम् अतिष्ठन् ? किं भवद्भिः कोऽपि मन्त्रजपः कृतः ? किं भवन्तः मन्त्रतन्त्रादिषु निपुणाः ?'' इति। तदा माघः अग्रे आगत्य अवदत् – ''महाराज ! भवता युक्तम् एव चिन्तितम्। वयं कञ्चित् महामन्त्रं जानीमः। तादृशः मन्त्रः अन्येन केनापि न ज्ञायते'' इति।

''सः मन्त्रः कः ?'' इति अपृच्छत् राजा।

''अस्मासु कोऽपि प्राणिहिंसां न करोति। अन्यतः बलात् किमपि वस्तु न स्वीकरोति। दुर्व्यवहारः केनापि न क्रियते। असत्यं न उच्यते। सर्वेषु दया प्रदर्श्यते। जीविषु प्रीतिः प्रदर्श्यते। दानं क्रियते। कासारादयः निर्मीयन्ते। ग्रामाणां स्वच्छता क्रियते। एषः एव अस्माकं मन्त्रः। इतः एव अस्माकं शक्तिः'' इति अवदत् माघः।

एतत् श्रुत्वा राजा आश्चर्येण पुनः अवदत् – ''मया श्रुतं यत् भवन्तः लुण्ठनं कुर्वन्ति इति। आयुधानि प्रदर्श्य जनेषु भीतिः उत्पाद्यते इत्यपि मया श्रुतम्। किम् एतत् सर्वं मिथ्या ?'' इति।

''महाराज ! भवता कस्यचित् पिशुनस्य वचने विश्वासः कृतः इति भाति। वस्तुस्थितिः भवता न परिशीलिता एव'' इति अवदत् माघः। ''भवन्तः आयुधधारिणः आसन् बन्धनसमये। अतः विचारणस्य आवश्यकता नास्ति इति मया चिन्तितम् आसीत्'' इति अवदत् राजा।

''महाराज ! वयम् आयुधधारिणः इति तु सत्यम्। किन्तु एतानि आयुधानि जनानां हिताय एव, न तु पीडनाय। वयं परशुभिः शाखाः कर्तयामः। लवित्रैः गुल्मादिकं छेदयामः। कासारनिर्माणाय, मार्गाणां समीकरणाय च अपेक्षितानि आयुधानि एव धरामः वयम्। प्रजापीडा स्वप्ने अपि न चिन्त्यते अस्माभिः'' इति अवदत् माघः।

राजा विचारणात् अवगतवान् यत् माघः सत्यम् एव वदति इति। अतः मिथ्यारोपं कृतवन्तं तं ग्रामाधिकारिणं सः कारागारे स्थापितवान्। उत्कोचस्वीकारादिना अन्याय्यमार्गेण सम्पादितं तदीयम् ऐश्वर्यं तेभ्यः युवकेभ्यः दत्त्वा सः अवदत् ''इतःपरं ग्रामव्यवहारं भवन्तः एव निर्वहन्तु। अन्यः ग्रामाधिकारी मया तत्र न प्रेष्यते'' इति। ततः तेन पट्टगजः तेभ्यः उपायनरूपेण दत्तः।

## अविमारकम् ( ग्रन्थपरिचयः )

व्योम शाहः

यस्य नाट्यसृष्टिः मौलिस्थान् अपि कवीन् रसेन मोहयति, तस्य महाकवेः भासस्य नाटकचक्राद् अविमारकम् इति नामधेयस्य नाटकस्य रसास्वदनं करिष्यामः।

**कृतिप्रकारः** – दशसु रूपकभेदेषु इयं कृतिः 'नाटकम्' इति भेदे अन्तर्भवति। नाटके ख्यातवृत्तं प्रसङ्गम् आधारीकृत्य रचना क्रियते। न्यूनातिन्यूनाः पञ्च अङ्काः अधिकतमाः वा दश अङ्काः भवन्ति। अस्मिन् बहवः रसाः भवन्ति। नायकः धीरोदात्तः भवति सः च प्रतापवान् राजर्षिः वा गुणवान् दिव्यः वा स्यात्। मुख्यः रसः शृङ्गारः वीरः वा भवेत्। अन्ये रसाः गौणाः। लक्षणे 'गोपुच्छाग्रसमाग्रम्' इत्युक्तम्–अर्थात् क्रमेण अङ्काः सूक्ष्माः कर्तव्याः।

**कृतेः मुख्या आधारसामग्री** – कृतेः मुख्यः आधारः गुणाढ्यस्य बृहत्कथा सोमदेवस्य वा कथासरित्सागरः। तत्रापि नाटके भासेन सूक्ष्माणि परिवर्तनानि कृतानि।

**नाटके पात्राणि** – नाटकेऽस्मिन् आहत्य एकविंशतिः पात्राणि येषु इमे मुख्याः –

राजा (कुन्तिभोजः), अविमारकः (सौवीरराजस्य पुत्रः) – सः एव विष्णुसेनः , विदूषकः (अविमारकस्य मित्रं सन्तुष्टाभिधम्), कुरङ्गी (कुन्तिभोजस्य दुहिता) कौञ्जायनः, भूतिकः, भटः, देवर्षिः नारदः, विद्याधरः तत्प्रियतमा च, देवी कुन्तिभोजमहिषी, सुदर्शना, प्रतिहारी, चेटी, धात्री, नलिनिका, मागधिका, विलासिनी, वसुमित्रा, हरिणिका, सौदामिनी इति अन्यानि पात्राणि।

**कृति-परिचयः** – नाटकेऽस्मिन् षड् अङ्काः सन्ति। शृङ्गारहास्यौ मुख्यौ रसौ स्तः। करुणाऽद्भुत–भयानकानां रसानां गौणता वर्तते। उपमा–उत्प्रेक्षा–ऽर्थान्तरन्यासानाम् अलङ्काराणां प्रयोगः बाहुल्येन दृश्यते। संस्कृतम् अतिरिच्य शौरसेन्याः प्रयोगः दृश्यते।

**नाटकसारः** (अङ्कानुगुणम्) – नान्द्यन्ते सूत्रधारः प्रविश्य नारायणस्य स्तुतिं करोति। सूत्रधारः नटी च स्थापनां कुरुतः।

**प्रथमोऽङ्कः** – प्रथमाङ्कस्य प्रारम्भः सपरिजनस्य राज्ञः कुन्तिभोजस्य आगमनेन भवति। कुरङ्गी–पिता कुन्तिभोजः स्वकीयां पितृव्यथां वर्णयति –

**''इष्टा मखा द्विजवराश्च मयि प्रसन्नाः, प्रज्ञापिता भयरसं समदा नरेन्द्राः।**
**एवंविधस्य च न मेऽस्ति मनः प्रहर्षः कन्यापितुर्हि सततं बहु चिन्तनीयम्॥''**

ततः महाराजेन देवी (महिषी) ज्ञाप्यते यत् कुरङ्गीनिमित्तं दूतः आगतः। देवी प्रसन्ना। कुन्तिभोजः स्वकीयायाः पुत्र्याः कुरङ्ग्याः विवाहविषये चिन्तितः। ''विवाहाः बहुशः परीक्ष्य कर्तव्याः'' इति मतम्।

**''जामातृसम्पत्तिम् अचिन्तयित्वा, पित्रा तु दत्ता स्वमनोभिलाषात्।**
**कुलद्वयं हन्ति मदेन नारी, कूलद्वयं क्षुब्धजला नदीव॥''**

तावति काले भटः प्रविश्य निवेदयति यत् अमात्यः कौञ्जायनः तेन मेलितुम् आगतः इति। नृपः तं प्रवेशयितुम् आज्ञापयति। कौञ्जायनः प्रविशन् अमात्य–व्यथां वर्णयति –

**''प्रसिद्धौ कार्याणां प्रवदति जनः पार्थिवबलं, विपत्तौ विस्पष्टं सचिवमतिदोषं जनयति।**
**अमात्या इत्युक्ताः श्रुतिसुखम् उदारं नृपतिभिः ससूक्ष्मं दण्ड्यन्ते मतिबलविदग्धाः कुपुरुषाः॥''**

पूर्वम् अमात्यः नृपेण आदिष्टः यत् तेन कुरङ्ग्या सह उद्यानं प्रति गन्तव्यम् इति। अतः तस्य प्रत्यागमनस्य हेतुं पृष्टवान्। अमात्यः कौञ्जायनः उक्तवान् यत् – ''यदा भर्तृदारिका कुरङ्गी दासीजनैः सह उद्याने क्रीडां करोति स्म, तदा कश्चिद् मदान्धः हस्ती तत्र आगतः। सर्वत्र हाहाकारः अभवत्। सेवकाः भटाः च निहताः। सः गजः अपि कुरङ्ग्याः यानम् एव प्राप्तः। ततः कश्चिद् दर्शनीयः शूरः तरुणः गजं प्रति गतवान्। तस्य करताडनेन रुष्टः गजः तं हन्तुकामः प्रतिनिवृत्तः। ततः अहं शीघ्रं कुरुङ्गीं यानम् आरोप्य कन्यान्तः पुरम् आनयम्।'' कुरङ्गी सुरक्षिता इति ज्ञात्वा महाराजः महतीं शान्तिम् अनुभूतवान्। सः पृष्टवान् यत् कथं भूतिकः न आगतः। तेन उक्तम् – ''भूतिकः तस्य तरुणस्य प्रवृत्तिम् अन्वयं च ज्ञात्वा आगमिष्यति।'' ततः प्रविशति भूतिकः। महाराजं कुन्तिभोजम् अभिवादयति। कुन्तिभोजः देव्यै कथयति यत् 'कुरङ्गीं समाश्वासय' इति। देवी निष्क्रान्ता। इदानीं भूतिकः वृत्तान्तं निवेदयति– ''सः तरुणः ततः तेन गजेन सह किञ्चित् क्रीडित्वा स्वकीयम् आवासं गतवान्। ततः तं गजं गजशालां प्रवेश्य प्रच्छन्न–वेषेण अहं गतवान्।'' ''सः शूद्र इति अस्माभिः श्रुतम्'' इति नृपेण उक्तम्।

**(क्रमशः... )**

## मासवार्ताः

### आयोजितानि व्याख्यानानि






संस्कृतरसिकाः संस्कृतसाहित्यस्य शास्त्राणां च परिचयं प्राप्नुयुः इति विचार्य एकलव्य–संस्कृत–एकेडेमी, संस्कृतविद्याप्रतिष्ठानं चेरिटेबल ट्रस्ट, संस्कृत–साहित्य–अकादमी, गान्धिनगरम् इत्येतेषां संयुक्तोपक्रमेण संस्कृत–साहित्य–रसास्वाद–व्याख्यानमालायाः आयोजनं क्रियते। आयोजनेऽस्मिन् मार्चमासस्य ११ दिनाङ्के डॉ. मञ्जुला वीरडिया (संस्कृत–विभागाध्यक्षा, श्रीमती ए.पी. पटेल–विनयन–महाविद्यालयः, नरोडा), दूतघटोत्कचम् इति विषये, डॉ. उर्वशी पटेलः (संस्कृतप्राध्यापिका, सी.यु.शाह–विनयन–महाविद्यालयः, अमदावादम्) दूतवाक्यम् इति विषये च व्याख्यानम् अकुरुताम्। मार्चमासस्य १८ दिनाङ्के डॉ. पङ्कजः रावलः (अध्यापकः, श्रीसोमनाथ–संस्कृत–विश्वविद्यालयः) भविष्यपुराणविषये मनोहरं व्याख्यानं प्रायच्छत्। व्याख्यानानां श्रवणेन सर्वेऽपि श्रोतारः सन्तुष्टाः आसन्।

### आरब्धः श्रीमद्भगवद्गीताश्लोकोच्चारणवर्गः

श्रीमद्भगवद्गीतायाः अध्ययनं कर्तुम् इच्छुकानां संस्कृतरसिकानां कृते एकलव्य–संस्कृत–एकेडेमी–संस्थानेन श्रीमद्भगवद्गीतायाः श्लोकोच्चारणस्य वर्गः मार्चमासस्य १४ दिनाङ्के आरब्धः वर्तते। अभ्यासक्रमेऽस्मिन् श्रीमद्भगवद्गीतायाः ५, ६, ७ अध्यायानाम् अध्यापनं भविष्यति। श्रीश्यामः पटेलः छात्राणां मार्गदर्शनं करिष्यति।

## कृपया हसन्तु

भ्राता - (भगिनीम् उद्दिश्य) रे भगिनि ! जलम् आनय ।

भगिनी - अत्रागत्य स्वयं जलं नय । नाहं ददामि ।

भ्राता - कृपया देहि ।

भगिनी - न ददामि । यदि पुन: जलं याचिष्यति तर्हि तत्रागत्य ताडयिष्यामि ।

भ्राता - अस्तु, यदा भवती ताडनार्थम् आगच्छति तदा जलम् आनयतु ।

★ ★ ★ ★ ★

रमण: - कश्चन सुवर्णचन्द्रकेन सम्मानित: विद्वान् वैद्य: एकं पुस्तकालयं गतवान् । तत्र एकस्य पुस्तकस्य शीर्षकं पठित्वा स: मूर्च्छित: अभवत् ।

नमन: - तत् पुस्तकं किम् आसीत् ?

रमण: - "३० दिनेषु वैद्य: भवतु" इति ।

★ ★ ★ ★ ★

अध्यापक: - (नमनम् उद्दिश्य) भवान् पठित्वा कां पदवीं प्राप्तवान् ? भवत: पदव्या: परिचयं संस्कृतभाषया वदतु ।

नमन: - नेत्रम् चायम् नेत्रम् ।

अध्यापक: - एतत् किम् अस्ति ? अहं न अवगतवान् । स्पष्टं वदतु ।

नमन: - आई.टी.आई.

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**दीप्यन्तां ये दीप्त्यैर्घटिता मणयश्च वीरपुरुषाश्च ।**
**तेज: स्वविनाशाय तु भवति तृणानामिव लघूनाम् ॥**

**तात्पर्यम्** – तृणसदृशानां लघूनां तेज: तेषां स्वविनाशाय भवति । मणिवत् विद्यमाना: वीरपुरुषा: स्वतेजसा एव प्रकाशन्ते ।

**दुर्मदानां परिध्वंसे यत् सुदर्शनचक्रवत् । लोकसङ्घटनं लोके नूनमायुधमैश्वरम् ॥**

**तात्पर्यम्** – दुष्टानां ध्वंसने सुदर्शनचक्रं यथा समर्थम् आयुधं तथैव लोके जनसङ्घटनम् ईश्वरीयम् आयुधम् अस्ति ।

**दूरीकरोति दुरितं विमलीकरोति चेतश्चिरन्तनमघं चुलुकीकरोति ।**
**भूतेषु किञ्च करुणां बहुलीकरोति सत्सङ्गति: कथय किं न करोति पुंसाम् ।**

**तात्पर्यम्** – लोके सर्वेषां जनानां स्नेहिता: भवन्ति एव । तेषु स्नेहितेषु सज्जनानां सङ्ख्या तु न्यूना एव । यत: स्वार्थपरा: एव अधिका: सन्ति लोके । तथापि अस्माभि: सज्जनानां सहवास: एव करणीय: इति वदन् सुभाषितकार: तत्र कारणमपि वदति – सज्जनानां सहवासेन पुरुषाणां मनसि स्थिता: दुष्टा: विचारा: दूरं गच्छन्ति । मन: शुद्धं भवति । पुरा कृतं पापमपि भस्म भवति । अपि च प्राणिनां विषये दया अधिका भवति । अत: सज्जनानां स्नेह: मनुष्याणां किं वा न करोति ? अर्थात् सर्वविधानि मङ्गलानि अपि जनयति ।

## ज्ञानसरित्

श्यामः पटेलः

**मरिचस्य कटुत्वम्** – जगति यः कटुभाषी भवति तस्य महिमा न गीयते अन्यैः। अतः अद्य अहं हरितवर्णीयं कटुरसमयं मरिचं स्वयमेव मम परिचयं कारयितुम् उद्यतम् अस्मि। भवन्तः अस्माकं मरिचानां सञ्चयानां मनोहारि दर्शनं शाकविपणिषु कुर्वन्ति एव। किन्तु भवन्तः अजानन्तः स्युः यत् अस्माकं त्रिसहस्राधिकाः प्रजातयः वर्तन्ते। अस्मासु सर्वेषु न्यूनाधिकं कटुत्वं भवति। यदा वयं रक्तवर्णीयानि भवामः तदा भवन्तः करुणाहीनाः पाकनिर्माणसमये अस्माकं चूर्णीकृत्य उपयोगं कुर्वन्ति। भवतु नाम! वयं तु परोपकारीणि औषधीयगुणोपेतानि स्मः। वयं स्वं स्वभावं न त्यजामः। यः खादति अस्मान् सः कटुत्वम् अनुभवति एव। कारणम् अस्ति अस्मासु विलसत् 'केप्सेसीन' नामकं द्रव्यम्। 'केप्सेसीन' इत्यस्य वर्णः गन्धः च न भवतः। किन्तु तत् कटुरसं विदधाति। वैज्ञानिकाः अस्माकं कटुत्वं मातुं 'स्कोवील-स्केल' इत्यस्य अन्वेषणं कृतवन्तः। एकस्मिन् मरिचे स्कोवील-घटकः यावान् भवति तावत् कटुत्वं तस्य मरिचस्य गण्यते। आसामराज्यस्य 'भूत जोलकिया' प्रजातिः विश्वे कटुतमा अस्ति। तस्य कटुत्वे एकलक्षाधिकाः स्कोवील-घटकाः भवन्ति। भवन्तः पाकशालायां प्रयोगं कुर्वन्ति तादृशेषु मरिचेषु तु त्रिसहस्रतः चतुस्सहस्रपर्यन्तं स्कोवील-घटकाः भवन्ति। आसामराज्यस्य 'भूत जोलकिया' प्रजातिः इव दक्षिण-अमेरिकायाः ट्रिनिडाड-द्वीपस्य ट्रिनिडाड-स्कोर्पियन-मरिचम् अपि कटुतमं भवति। 'चोकलेट हबालोकिया', 'डोर्सेट नागा', 'सेवन पोट हबानेरो', 'नागा वाइपर' तथा च 'केरोलीना रीपर' इत्यादीनि मरिचानि अधिकं कटुत्वं विदधति। 'केप्सेसीन' नामकं द्रव्यं जले न गलति। किन्तु मेदस्विद्रव्ये गलति। अतः कटुत्वम् अनुभूते सति दुग्धं पिबन्ति चेत् 'केप्सेसीन' गलति। ततः कटुत्वस्य तीक्ष्णता न्यूनीभवति। अहो! मया मूर्खवाचालेन स्वकीयमेव रहस्यम् उद्घाटितम्। भवतु। यत् मरिचं भवन्तः 'केप्सीकम' वा 'बेल पेपर' नाम्ना जानन्ति तस्मिन् 'केप्सेसीन' नामकं द्रव्यं न भवति। अतः कटुत्वं न अनुभूयते भवद्भिः। ज्ञातं खलु?

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **मधुमासः** | चैत्र मास | lunar month-cairtus |
| **शृतः** | पका हुआ | cooked |
| **क्लमः** | थकान | fatigue |
| **तास्कर्यम्** | चौर्य | robber |
| **राम्बाधः** | संकट | difficulty |
| **संहर्षः** | आनन्द | thrus of joy |
| **सहतिः** | ऐका | union |
| **प्रस्तरऋ** | पाषाण | stone |
| **प्रसूनम्** | पुष्प | flower |
| **प्रसूः** | माता | mother |
| **अन्तर्गडु** | निरर्थक | approfitable |
| **अन्तरीप** | द्वीप | island |
| **अन्तरा** | मध्य मे | inside |
| **अन्त्रम्** | आंत | intestine |
| **धोरणिः** | अविच्छिन्न परम्परा | tradition |

## किं भवन्तः जानन्ति ?

**१) भारतस्य विश्वप्रसिद्धस्य नालन्दाविश्वविद्यालयस्य स्थापनां कः कृतवान्?**

(क) चाणक्यः (ख) चन्द्रगुप्तः (ग) कुमारगुप्तः (घ) कनिष्कः

**२) एतेषु कः अकबरस्य नवरत्नेषु प्रसिद्धः गायकः आसीत्?**

(क) अबुलफजलः (ख) तानसेनः (ग) बीरबलः (घ) फोजी

**३) एतेषु कः महापुरुषः संस्कृतव्याकरणस्य जनकः आसीत्?**

(क) पतञ्जलिः (ख) पाणिनिः (ग) दधीचः (घ) कणादः

**४) एतेषु कः सम्राट् शकसंवत्सरस्य प्रारम्भम् अकरोत्?**

(क) कनिष्कः (ख) ललितादित्यः (ग) हर्षः (घ) विक्रमादित्यः

**५) एतेषु कः प्रार्थनासमाजस्य स्थापनाम् अकरोत्?**

(क) बालगङ्गाधरः (ख) दयानन्दः (ग) केशवचन्द्रः (घ) श्रीअरविन्दः

**६) ब्रह्मसमाजस्य स्थापनां कः अकरोत्?**

(क) विद्यासागरः (ख) दयानन्दः (ग) राजाराममोहनरायः

(घ) रामकृष्णः

उत्तराणि – (१) ग (२) ख (३) ख (४) क (५) ग (६) ग

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
||जयतु संस्कृतं जयतु भारतम्||

## ग्रीष्मवर्गः

**(1 May 2023 to 11 May 2023)**

**संस्कृतव्याकरणम्**
(Class 9 - 10) 8am to 9:30am 3500/-

**बालसंस्कृतवर्गः**
(Class 1 to 8) 10am to 11:30am 2500/-

**वैदिकगणितम्**
(Class 8 & above) 6:30pm to 8pm 3500/-

**(15 May 2023 to 25 May 2023)**

**बालसंस्कृतवर्गः**
(Class 1 to 8) 10am to 11:30am 2500/-

**(16 May 2023 to 30 May 2023)**

**संस्कृतव्याकरणम्**
(Class 9-10CBSE) 8am to 9:30am 3500/-

**contact: Dr Mihir Upadhyay, 98246 16237**

EKLAVYA SANSKRIT ACADEMY
||जयतु संस्कृतं जयतु भारतम्||

## छन्दःपरिचयः

**Date :** 17/5/23 to 9/6/23
**Day :** Wed-Fri
**Time :** 6:30pm to 8:00pm (IST)
**Fees :** 2500/-

## Admission Open 2023-24

**Value Education Through Sanskrit**

## बालसंस्कृतवर्गः

**(Class SKg to 8)**

**Online / Offline**

**Date :** 11/6/23 to 24/3/24
**Day :** Sunday
**Time :** 11:00am to 12:30pm (IST)
**Fees :** 7000/-

**contact: Dr Mihir Upadhyay, 98246 16237**

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | – 100 |
| द्वैवार्षिकं रू | – 175 |
| त्रैवार्षिकं रू | – 250 |
| अङ्कमूल्यं रू | – 10 |

**प्रियवाचकाः**
- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
||जयतु संस्कृतं जयतु भारतम्||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006